# .. shrIdurgAmAnasa pUjA ..

# ॥ શ્રીદુર્ગામાનસ પૂજા ॥

## Document Information

Text title : durgAmAnasa pUjA

File name : durgaamaanasa.itx

Category : pUjA

Location : doc_devii

Author : Traditional

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : WebD

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Description-comments : durgAtantre

Latest update : October 14, 2004

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ શ્રીદુર્ગામાનસ પૂજા ॥

શ્રી ગણેશાય નમઃ ।
ઉદ્યચ્ચન્દનકુઙ્કુમારુણપયોધારાભિરાપ્લાવિતાં
નાનાનર્ઘ્યમણિપ્રવાલઘટિતાં દત્તાં ગૃહાણામ્બિકે ।
આમૃષ્ટાં સુરસુન્દરીભિરભિતો હસ્તામ્બુજૈર્ભક્તિતો
માતઃ સુન્દરિ ભક્તકલ્પલતિકે શ્રીપાદુકામાદરાત્ ॥ ૧॥

દેવેન્દ્રાદિભિરર્ચિતં સુરગણૈરાદાય સિંહાસનં
ચઞ્ચત્કાઞ્ચનસઞ્ચયાભિરચિતં ચારુપ્રભાભાસ્વરમ્ ।
એતચ્ચમ્પકકેતકીપરિમલં તૈલં મહાનિર્મલં
ગન્ધોદ્વર્તનમાદરેણ તરુણીદત્તં ગૃહાણામ્બિકે ॥ ૨॥

પશ્ચાદ્દેવિ ગૃહાણ શમ્ભુગૃહિણિ શ્રીસુન્દરિ પ્રાયશો
ગન્ધદ્રવ્યસમૂહનિર્ભરતરં ધાત્રીફલં નિર્મલમ્ ।
તત્કેશાન્ પરિશોધ્ય કઙ્કતિકયા મન્દાકિનીસ્રોતસિ
સ્નાત્વા પ્રોજ્જ્વલગન્ધકં ભવતુ હે શ્રીસુન્દરિ ત્વન્મુદે ॥ ૩॥

સુરાધિપતિકામિનીકરસરોજનાલીધૃતાં
સચન્દનસકુઙ્કુમાગુરુભરેણ વિભ્રાજિતામ્ ।
મહાપરિમલોજ્જ્વલાં સરસશુદ્ધકસ્તૂરિકાં
ગૃહાણ વરદાયિનિ ત્રિપુરસુન્દરિ શ્રીપ્રદે ॥ ૪॥

ગન્ધર્વામરકિન્નરપ્રિયતમાસન્તાનહસ્તામ્બુજ-
પ્રસ્તારૈર્ધ્રિયમાણમુત્તમતરં કાશ્મીરજાપિઞ્જરમ્ ।
માતર્ભાસ્વરભાનુમણ્ડલલસત્કાન્તિપ્રદાનોજ્જ્વલં
ચૈતન્નિર્મલમાતનોતુ વસનં શ્રીસુન્દરિ ત્વન્મુદમ્ ॥ ૫॥

સ્વર્ણાકલ્પિતકુણ્ડલે શ્રુતિયુગે હસ્તામ્બુજે મુદ્રિકા
મધ્યે સારસના નિતમ્બફલકે મઞ્જીરમંઘ્રિદ્વયે ।
હારો વક્ષસિ કઙ્કણૌ ક્વણરણત્કારૌ કરદ્વન્દ્વકે
વિન્યસ્તં મુકુટં શિરસ્યનુદિનં દત્તોન્મદં સ્તૂયતામ્ ॥ ૬॥

ગ્રીવાયાં ધૃતકાન્તિકાન્તપટલં ગ્રૈવેયકં સુન્દરં
સિન્દૂરં વિલસલ્લલાટફલકે સૌન્દર્યમુદ્રાધરમ્ ।
રાજત્કજ્જલમુજ્જ્વલોત્પલદલશ્રીમોચને લોચને
તદ્દિવ્યૌષધિનિર્મિતં રચયતુ શ્રીશામ્ભવિ શ્રીપ્રદે ॥ ૭॥

અમન્દતરમન્દરોન્મથિતદુગ્ધસિન્ધૂદ્ભવં

નિશાકરકરોપમં ત્રિપુરસુન્દરિ શ્રીપ્રદે ।
ગૃહાણ મુખમીક્ષતું મુકુરબિમ્બમાવિદ્રુમૈ-
ર્વિનિર્મિતમધચ્છિદે રતિકરામ્બુજસ્થાયિનમ્ ॥ ૮॥

કસ્તૂરીદ્રવચન્દનાગુરુસુધાધારાભિરાપ્લાવિતં
ચઞ્ચચ્ચમ્પકપાટલાદિસુરભિર્દ્રવ્યૈઃ સુગન્ધીકૃતમ્ ।
દેવસ્ત્રીગણમસ્તકસ્થિતમહારત્નાદિકુમ્ભવ્રજૈ-
રમ્ભઃશામ્ભવિ સમ્ભ્રમેણ વિમલં દત્તં ગૃહાણામ્બિકે ॥ ૯॥

કહ્લારોત્પલનાગકેસરસરોજાખ્યાવલીમાલતી-
મલ્લીકૈરવકેતકાદિકુસુમૈ રક્તાશ્વમારાદિભિઃ ।
પુષ્પૈર્માલ્યભરેણ વૈ સુરભિણા નાનારસસ્રોતસા
તામ્રામ્ભોજનિવાસિનીં ભગવતીં શ્રીચણ્ડિકાં પૂજયે ॥ ૧૦॥

માંસીગુગ્ગુલચન્દનાગુરુરજઃ કર્પૂરશૈલેયજૈ-
ર્માધ્વીકૈઃ સહકુઙ્કુમૈઃ સુરચિતૈઃ સર્પિર્ભિરામિશ્રિતૈઃ ।
સૌરભ્યસ્થિતિમન્દિરે મણિમયે પાત્રે ભવેત્ પ્રીતયે
ધૂપોઽયં સુરકામિનીવિરચિતઃ શ્રીચણ્ડિકે ત્વન્મુદે ॥ ૧૧॥

ઘૃતદ્રવપરિસ્ફુરદ્રુચિરરત્નયષ્ટ્યાન્વિતો
મહાતિમિરનાશનઃ સુરનિતમ્બિનીનિર્મિતઃ ।
સુવર્ણચષકસ્થિતઃ સઘનસારવર્ત્યાન્વિત-
સ્તવ ત્રિપુરસુન્દરિ સ્ફુરતિ દેવિ દીપો મુદે ॥ ૧૨॥

જાતીસૌરભનિર્ભરં રુચિકરં શાલ્યોદનં નિર્મલં
યુક્તં હિઙ્ગુમરીચજીરસુરભિર્દ્રવ્યાન્વિતૈર્વ્યઞ્જનૈઃ ।
પક્વાન્નેન સપાયસેન મધુના દધ્યાજ્યસમ્મિશ્રિતં
નૈવેદ્યં સુરકામિનીવિરચિતં શ્રીચણ્ડિકે ત્વન્મુદે ॥ ૧૩॥

લવઙ્ગકલિકોજ્જ્વલં બહુલનાગવલ્લીદલં
સજાતિફલકોમલં સઘનસારપૂગીફલમ્ ।
સુધામધુરમાકુલં રુચિરરત્નપાત્રસ્થિતં
ગૃહાણ મુખપઙ્કજે સ્ફુરિતમમ્બ તામ્બૂલકમ્ ॥ ૧૪॥

શરત્પ્રભવચન્દ્રમઃ સ્ફુરિતચન્દ્રિકાસુન્દરં
ગલત્સુરતરઙ્ગિણીલલિતમૌક્તિકાડમ્બરમ્ ।
ગૃહાણ નવકાઞ્ચનપ્રભવદણ્ડખણ્ડોજ્જ્વલં
મહાત્રિપુરસુન્દરિ પ્રકટમાતપત્રં મહત્ ॥ ૧૫॥

માતસ્ત્વન્મુદમાતનોતુ સુભગસ્ત્રીભિઃ સદાऽऽન્દોલિતં
શુભ્રં ચામરમિન્દુકુન્દસદૃશં પ્રસ્વેદદુઃખાપહમ્ ।
સદ્યોऽગસ્ત્યવસિષ્ઠનારદશુકવ્યાસાદિવાલ્મીકિભિઃ
સ્વે ચિત્તે ક્રિયમાણ એવ કુરુતાં શર્માણિ વેદધ્વનિઃ ॥ ૧૬॥

સ્વર્ગાઙ્ગણે વેણુમૃદઙ્ગશઙ્ખભેરીનિનાદૈરુપગીયમાના ।
કોલાહલૈરાકલિતાતવાસ્તુ વિદ્યાધરીનૃત્યકલાસુખાય ॥ ૧૭॥

દેવિ ભક્તિરસભાવિતવૃત્તે પ્રીયતાં યદિ કુતોऽપિ લભ્યતે ।
તત્ર લૌલ્યમપિ સત્ફલમેકઞ્જન્મકોટિભિરપીહ ન લભ્યમ્ ॥ ૧૮॥

એતૈઃ ષોડશભિઃ પદ્યૈરુપચારોપકલ્પિતૈઃ ।
યઃ પરાં દેવતાં સ્તૌતિ સ તેષાં ફલમાપ્નુયાત્ ॥ ૧૯॥

॥ ઇતિ દુર્ગાતન્ત્રે દુર્ગામાનસપૂજા સમાપ્તા ॥

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

.. shrIdurgAmAnasa pUjA ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*